श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ नारायणोपनिषत् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नारायणोपनिषत् ॥

ओं अथ पु॒रुषो ह वै नारायणोऽकामयत प्रजाः सृ॑जे॒येति। ना॒रा॒य॒णात्प्रा॑णो जा॒यते। मनः सर्वे॑न्द्रि॑याणि॒ च। खं वायु॒र्ज्योतिरापः पृथिवी विश्व॑स्य धा॒रिणी। ना॒रा॒य॒णाद्ब्र॑ह्मा जा॒यते। ना॒रा॒य॒णाद्रु॑द्रो जा॒यते। ना॒रा॒य॒णादि॑न्द्रो जा॒यते। ना॒रा॒य॒णात्प्रजापतयः प्र॑जाय॒न्ते। ना॒रा॒य॒णाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि च छ॑न्दागुं॒सि। ना॒रा॒य॒णादेव समु॑त्पद्य॒न्ते। ना॒रा॒य॒णे प्र॑वर्त॒न्ते। ना॒रा॒य॒णे प्र॑लीय॒न्ते॥

ओं अथ नित्यो ना॑राय॒णः। ब्र॒ह्मा ना॑राय॒णः। शि॒वश्च॑ नाराय॒णः। श॒क्रश्च॑ नाराय॒णः। द्या॒वा॒पृ॒थि॒व्यौ च॑ नाराय॒णः। का॒लश्च॑ नाराय॒णः। दि॒शश्च॑ नाराय॒णः। ऊ॒र्ध्वश्च॑ नाराय॒णः। अ॒धश्च॑ नाराय॒णः। अ॒न्त॒र्ब॒हिश्च॑ नाराय॒णः। नारायण एवे॑दग्ं स॒र्वम्। यद्भु॒तं यच्च॒ भव्यँ॑म्। निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शु॒द्धो देव एको॑ नाराय॒णः। न द्वितीयौँ॑ऽस्ति॒ कश्चि॑त्। य ए॑वं वे॒द। स विष्णु॑रेव भवति स विष्णु॑रेव भ॒वति॥

ओमित्य॑ग्रे व्या॒हरेत्। नम इ॑ति प॒श्चात्। ना॒रा॒य॒णायेत्यु॑परि॒ष्टात्। ओमि॑त्ये-का॒क्षरम्। नम इति॑ द्वे अ॒क्षरे। ना॒रा॒य॒णायेति पञ्चाँ॑क्षरा॒णि। एतद्वै नारायणस्याष्टाक्ष॑रं प॒दम्। यो ह वै नारायणस्याष्टाक्षरं पद॑मध्ये॒ति। अनपब्रवस्सर्वमा॑यु॒रेति। विन्दते प्रा॑जाप॒त्यग्ं रायस्पोष॑ं गौप॒त्यम्। ततोऽमृतत्वमश्नु॒ते ततोऽमृतत्वमश्नु॑त इ॒ति। ये ए॑वं वे॒द॥

प्रत्यगानन्दं ब्रह्म पु॒रुषं प्रणव॑स्वरू॒पम्। अकार उकार मका॑र इ॒ति। तानेकधा समभरत्तदेतं॑दोमि॒ति। यमु॒क्त्वा॑ मु॒च्यते॑ यो॒गी॒ ज॒न्म॒संसा॑रब॒न्धनात्। ओं नमो नारायणायेति म॑न्त्रोपा॒सकः। वैकु॒ण्ठभु॒वनलो॑कं ग॒मि॒ष्यति। तददिदं परं पु॒ण्डरीकं

विज्ञानघनम्। तस्मात्तदिदावन्मात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम्। सर्वभूतस्थमेकं नारायणम्। कारणरूपमकार परब्रह्मोम्। एतदथर्व शिरोयोऽधीते। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात्प्रमुच्यते। सर्व वेद पारायण पुण्यं लभते। नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति। य एवं वेद। इत्युपनिषत्॥